श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

॥ धामवैभवस्तबकः अष्टादशः ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

॥ धामवैभवस्तबकः अष्टादशः ॥

अरविन्दवनं वन्दे तदहं यदहर्निशम्।
प्रीतिपूर्वकमध्यास्ते पीताम्बर कुटुम्बिनी ॥ **18.1** ॥

सारसात्मनि तवाम्ब मन्दिरे
द्वारपालकजना इवेन्दिरे।
चारुकेसर सुवर्णयष्टिका -
धारिणः प्रतिवसन्ति षड्पदाः ॥ **18.2** ॥

तावकं पदमभिख्यया रमे
वारिजं प्रणिगदन्ति सूरयः।
प्रौढशोभनखरांशु वैभव -
प्राप्तमञ्जिम सदालिसेवितम् ॥ **18.3** ॥

प्रबिभ्रति भवत्पदप्रणय तद्विपर्यासयोः
जना विभवदुर्गती जननि तत्र चोदाहृतिः।
सहस्रवसुरेधते सरसिजानुकूले रविः
स भिक्षुकशिरोमणिः श्रयति तत्प्रतीपः क्षयम् ॥ **18.4** ॥

कपटकिटिदशायां कैटभारिः क्षमाभाक्
प्रभुरकृत यतोऽसौ पङ्कजाते निवासम्।
तदिह भजसि भर्तुर्धर्ममेवानुसर्तुं
परमपुरुषकान्ते पङ्कजातस्थितिं किम् ॥ **18.5** ॥

स्थानं समस्तवसुवृद्धिपुषस्तवापि
पद्मं रमे नवसुमत्वमुपैति चित्रम्।
अप्यन्यदद्भुतममुष्य तु योऽनुकूलः
शश्वद्बिभर्ति वसुमत्त्वमसौ पतङ्गः॥ **18.6**॥

सन्मानसोल्लसनदः सदसद्विवेके
शक्तः सरोजनिलये सदनं त्वदीयम्।
शब्दैः शुभैः श्रुतिपथं सुखयन् गभीरैः
संसेवते जननि हंसगणोऽवदातः॥ **18.7**॥

कमले कमलेषु सन्निधत्से
सकलेषु स्ववशेषु विष्टपेषु।
सहजं जननीजनस्य लोके
जलजातेषु विशेषवत्सलत्वम्॥ **18.8**॥

कल्हारोत्पलकैरवादिषु तथा कल्याणि माल्यादिषु
प्रायः सत्सु सुमेषु वस्तुषु परं पद्मानि सद्मानि ते।
भाग्यं कुत्रचिदेव नृत्यतितरां भूयस्सु तुल्येष्वपि
त्वत्कान्ताय सुगन्धिवस्तुषु तुलस्येकैव सा रोचते॥ **18.9**॥

त्वद्गेहं कमलं यतस्त्वदविनाभूतस्य विष्णोः पदं
सूर्यालोकविकासमञ्चति ततः पद्मे मधुस्वादु तत्।
अन्नादोऽहमितीव गीतिनिनदैः श्रुत्यन्तसञ्चारिभिः
कृष्णाकारजुषोऽत्र केचिदनिशं नन्दन्ति लब्ध्वा रसम्॥ **18.10**॥

सूर्यालोकदशासु हर्षमयते दोषाकरालोकने
सङ्कोचं भजति श्रितालिषु रमे दत्ते परं जीवनम्।
स्थानं पङ्कमधः करोति वहते नालीकशब्दं च ते
कां वा तावकसन्निधानमहिमा कुर्यान्न चर्यां शुभाम्॥ **18.11**॥

धत्ते सदैव शिरसा तव पादरेणून्
पद्मे बिभर्ति तव नाम च पद्ममेतत्।
वर्वर्ति धारकतया तव हस्तमेव
तद्युक्तमृच्छति तवोज्ज्वलदास्यलक्ष्मीम्॥ **18.12**॥

प्रातः कृताप्लवविधिः पयसां निधाने
ब्रध्नोऽर्चकः शुचिकरो भृततप्तचक्रः।
उद्घाटयत्युदित विष्णुपदैकसक्तिः
विश्वाम्ब पद्ममयसद्म दलाररं ते॥ **18.13**॥

ब्रह्मा यस्मादजनि वहते चारु पीतांशुकं यत्
सान्द्रामोदं सततममृतस्थानमेवाश्रितं च।
अर्हत्यब्जं तव पदमिदं श्रीनिवासाभिधानं
मातर्दोषो न भवति मधुस्निग्धता धर्मभूम्नि॥ **18.14**॥

अहो मुकुन्दसुन्दरि त्वदीयमन्दिराहितः
स्वयं क्षयं व्रजन्नयं स्वरक्षिणं क्षिणोत्यपि।
सरोरुहद्रुहः शिवः शिरोऽधिरोहदुष्कृतात्
विदिक्षु दिक्षु भिक्षुकः स्फुटं नटन्नटाट्यते॥ **18.15**॥

त्वद्धाम्नः सरसीरुहस्य च मिथस्त्वत्कान्त धामात्मनो
मार्ताण्डस्य च पुण्डरीकनिलये मैत्री निसर्गोदिता।
कल्याणीं युवयोरियं विवृणुते कैमुत्यनीत्या मिथः
प्रीतिं कामपि भूयसीमविदिताक्षेपामनौपाधिकीम्॥ **18.16**॥

कति न कुसुमंमन्यान्यन्यानि देवि वने वने
न हि समुदितेष्वप्येतेषु क्षमा कमलोपमा।
भगवति भवत्सान्निध्येन प्रभोः कमलानि यत्
करचरणदृक्कल्पानीति स्थिरं दधते यशः॥ **18.17**॥

हरेः करस्पर्शनतः प्रहृष्टा
पयस्युदीता रुचिरालिकान्ता।
वाराशिकन्ये वसतिस्त्वदीया
बिभर्ति युक्तं कमलाभिधानम्॥ **18.18**॥

भृङ्गीसङ्गीत्युदयसुभगं मञ्जुकिञ्जल्कपुञ्ज -
स्फारस्तम्भं किमपि विकसत्पत्रसच्चित्रभित्ति।
पर्याश्लिष्टं विमलसरसा कर्णिकास्वर्णपीठं
पद्मं विद्मः परमनुगुणं सद्म पद्मे भवत्याः॥ **18.19**॥

दुग्धाम्बुराशिदुहितुस्तव सन्निधानात्
स्वर्णस्थितिर्भवति हन्त कुशेशयस्य।
तत्सम्भवोऽप्यभवदम्ब हिरण्यगर्भः
धन्याः खलु त्वदनुबन्ध्यनुबन्धिनोऽपि॥ **18.20**॥

नवसारसवासमाचरन्त्याः
तव साधर्म्यमिवाम्ब लब्धुकामः।
पुरुषः परमः सदा विधत्ते
पुरमध्यस्थितपुण्डरीकवासम्॥ **18.21**॥

अस्ति ते हरिपुरन्ध्रि नीरज -
स्थानमित्युदितमास्पदद्वयम्।
एकमाहुरिह तु त्रिपात्पदं
देवि षड्वदपदं परं पुनः॥ **18.22**॥

सुरादिजीवैरमृतैकनिष्ठैः
चिराय यैरम्ब विभाव्यसेऽन्तः।
आलोकमग्र्यं हरिरेषु तन्वन्
आमोदमन्यादृशमादधाति॥ **18.23**॥

अदो दधानं कमलाभिधानम्
अम्भश्च तज्जं च समं तवास्ताम्।
आद्यस्य पुंसः पदमाहुराद्यं
त्वदीयवासं जननि द्वितीयम्॥ **18.24**॥

क्षमास्वर्णस्फूर्तिं सततमधिगम्यापि कमले
गुणादार्द्र्याच्छन्दं कमपि भजते नालमिति यत्।
तदेवालङ्कारं नयति नलिनं स्पर्शनवशात्
तनोति ह्यौदार्यं तव जननि सान्निध्यमहिमा॥ **18.25**॥

भगवति परब्रह्माद्वैत प्रसङ्गंजुषस्तव
प्रथयति लसद्धर्मालीकत्वमत्र हि दर्शनम्।
त्वमुचितमधिष्ठानं नालीकमाश्रयसे ततः
तव किल सदालोकः सर्वोऽपि कल्पनगो रमे॥ **18.26**॥

यत्रोत्तमस्फुरणयन्त्रितचित्तवृत्तौ
नित्योल्लसद्रजसि राजति सारसत्वम्।
स्थानं प्रधानमिदमब्धिसुते यतस्ते
स्थाने तदत्र रमते महदादितत्त्वम्॥ **18.27**॥

सिंहासनस्थिति जुषस्तव वासयोग्यं
नित्यं भवेयमिति निश्चयमेत्य नूनम्।
केसर्यभूत् सरसिजं नरसिंहकान्ते
तद्द्वेषमेष तनुते तत एव पद्मे॥ **18.28**॥

अब्जं विधौ द्विषति देव्यमृतैकवृत्ति
कामेन हन्त यदनीयत मार्गणत्वम्।
तस्य स्वतोऽम्बरमणिस्फुटवस्ववाप्तिः
उल्लासहेतुरभवत् तव सन्निधानात्॥ **18.29**॥

उत्फुल्लवारिरुहतल्लज केलिगेहे
सर्वेश्वरस्य दयितां शयितां ननु त्वाम्।
वैतालिका इव गृहीतसुजातगीताः
प्रातः शनैर्मधुकराः प्रतिबोधयन्ति॥ **18.30**॥

सहंसकासारबहूर्मिकोज्ज्वला
पयोजराजिः प्रतिपन्नकर्णिका।
सहस्रवस्वाप्तित एधते रमे
श्रियः श्रयन्ते ह्यखिलास्त्वदाश्रयम्॥ **18.31**॥

स ते निवासः शयनीकृतो वा
नाथेन नित्यं नयनीकृतो वा।
फणैः सहस्रेण वृतो दलैर्वा
शेते बिले वा कमले कुशे वा॥ **18.32**॥

श्रीसूक्तं ते जननि नलिनं स्थानमाख्याति मुख्यं
दृष्टान्तं त्वत्प्रियतमदृशोरन्तरादित्यविद्या।
जन्मस्थानं तव तनुभुवो धातुराथर्वणादिः
त्वत्सान्निध्यात् क्व च न भवति श्रीरनिम्ना महिम्नाम्॥ **18.33**॥

शैवालकान्तरगतं तव सद्म विद्मः
सारङ्गलाञ्छितवपुर्मिलितामृतौघम्।
पूष्णा च दत्तरुचि पुंसि नपुंसके च
ख्यातस्य मातरिदमब्जपदस्य वाच्यम्॥ **18.34**॥

कान्तः पदत्रयमितस्थलयाचकस्ते
त्वं त्वम्ब षड्वदमिते निलये निविष्टा।
स्थानान्यथापि विपुलानि समाश्रितानां
चित्रं युवां कलयतश्चिरमुच्छ्रितानि॥ **18.35**॥

त्वत्पादपङ्कजरजः कणधन्यधन्ये -
ष्वम्भोरुहेषु वसतामलिपोतकानाम्।
वर्गेषु हन्त जननं वलशासनाद्याः
वाञ्छन्ति किं पुनरमी वयमब्धिकन्ये॥ **18.36**॥

सरोगमुपसेवितेऽप्यहह पूर्णचन्द्रोदये
ज्वरोपहतमम्बुजं तव परिग्रहादिन्दिरे।
विकासयति विज्वरं विरचयन्नसौ भास्करः
रवेररुजमाप्नुयादिति न पूर्वभाषा मृषा॥ **18.37**॥

कल्याणधर्मा कमलासनाया
मूर्तिं हि यस्ते मतिमानुपास्ते।
कन्ये सुधाब्धेः कमलासनत्वं
तस्योचितं तत्क्रतुनीतिभूम्ना॥ **18.38**॥

विच्छिन्नमब्दशतक व्यवधानतो यत्
सन्दर्शनं सहभुवः शशिनः कदाचित्।
तत्पद्मवासिनि तदीक्षणवर्जनाय
तस्योदयेषु निजसद्म किमावृणोषि॥ **18.39**॥

वारिजवनस्य भाग्यं वर्णयितुं नैव वयममी शक्ताः।
कमले तव स्थितौ यद्विकल्पितं वक्षसा समं विष्णोः॥ **18.40**॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे धामवैभवस्तबकः अष्टादशः॥